National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2016; 1(6): 32-33
© 2016 NJHSR
www.sanskritarticle.com

**देवनाथ त्रिपाठी**
संस्कृत- प्रगत- अध्ययनकेन्द्रम्,
सावित्रीबाई फुले पुणे विद्या पीठम् ,
पुणे

**Correspondence:**
**देवनाथ त्रिपाठी**
संस्कृत- प्रगत- अध्ययनकेन्द्रम्,
सावित्रीबाई फुले पुणे विद्या पीठम् ,
पुणे

# व्यपदेशिवद्भावविमर्शः

**देवनाथ त्रिपाठी**

निमित्तसद्भावाद् मुख्यव्यपदेशो यस्यास्ति स व्यपदेशी, यस्तु व्यपदेशहेत्वाभावाद् अविद्यमानव्यपदेशः स तेन तुल्यं वर्तते कार्यं प्रति इति व्यपदेशिवद् भवति इति उच्यते इति कैय्यटः। निमित्तसद्भावाद्विशिष्टोऽपदेशो मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी। यस्तु व्यपदेशहेत्वाभावादविद्यमानव्यपदेशोऽसहायः स तेन तुल्यं वर्तते कार्यं प्रति इति एकस्मिन्नसहायेऽपि तत्कार्यं कर्तव्यमित्यर्थ इति नागेशभट्टः।

निमित्ते सति निमित्ताश्रितो व्यवहारो व्यपदेशो भवति। व्यपदेशस्य विषयो व्यपदेशी। यथा अत इञ् इति सूत्रे विशेष्यत्वेनानुवृत्तस्य प्रातिपदिकस्य तदन्तविधौ अदन्तात् प्रातिपदिकादपत्येऽर्थे इञ् स्यादिति सूत्रार्थः सम्पद्यते। दक्षादिशब्देष्वदन्तव्यवहारस्य निमित्तमदन्तत्वमस्ति। अत एतेषां विषये अदन्तव्यवहारो मुख्यः, तेनैते शब्दा व्यपदेशिनः। यत्र व्यवहारस्य निमित्तं विद्यमानं नास्ति परं लक्ष्यानुरोधेन व्यवहार आवश्यकः, तत्रारोपितव्यवहारो भवति निमित्तं विनापि। मुख्यव्यपदेशिना यथा कार्यं क्रियते तथैव कल्पितव्यपदेशिनापि इति यावत्। अत एव अस्यापत्यम् इरित्यस्मिन् प्रयोगे अस्य मुख्यत्वेन अदन्तव्यपदेशनिमित्तविरहेऽपि अदन्तव्यपदेशो भवति दक्षादिशब्दानामिव व्यपदेशप्रयुक्तमिञादिप्रत्ययविधानरूपकार्यमपि तस्य भवति। व्यपदेशिवद्भावोऽतिदेशकार्यमिव लक्ष्योपपादनार्थ एव। तदर्थमेव तस्यौपयोगित्वं सिद्ध्यति। असहायविषयको भवति व्यपदेशिवद्भाव इति पुरस्तादवोचाम। असहायत्वञ्च अतिदिश्यमानधर्मवदसमभिव्याहृतत्वे सति अतिदिश्यमानधर्मवदघटकत्वे सति अतिदिश्यमानधर्मवदघटितत्वम्। यथा अ इत्यत्र अतिदिश्यमानधर्मोऽदन्तत्वम्, अदन्तत्वधर्मवान् वर्णः कोप्यकारस्य समीपे नास्ति, तदसमभिव्याहृतत्वमकारे आयातमिति लक्षणसमन्वयः। अकारोऽयमतिदिश्यमानधर्मवतः कस्याप्यन्यस्य वर्णस्य घटकोऽपि नास्ति, अकारं परित्यज्य कस्याप्यन्यस्य प्रकृतिभूतस्य वर्णस्य अकारोऽवयवो नास्तीति द्वितीयं विशेषणमपि सङ्गतम्। अकारस्य एकस्वरात्मकत्वेन नाप्ययमन्येन केनापि वर्णेन घटितः। व्यपदेशिवद्भावं विना नहि स्वः स्वघटितो भवति। एवमसहायत्वस्य स्वरूपे स्पष्टे परिभाषायाः परिष्कृतोऽर्थ इत्थं भवति – स्वविशिष्टे स्वस्यातिदेशः। वैशिष्ट्यञ्च स्वाश्रयऽसमभिव्याहृतत्व - स्वाश्रयऽघटकत्व - स्वाश्रयाऽघटितत्वैतत्त्रितयसम्बन्धेन।

स्वस्यार्थोऽतिदिश्यमानधर्मः। स प्रकृते अदन्तत्वम्, तस्याश्रयोऽदन्तत्वविशिष्टो वर्णः, तस्य समभिव्याहृतत्वमकारे नास्तीति लक्षणसमन्वयः। अत्र पूर्वपक्षी एवं प्रत्यवतिष्ठते – नन्वेवं सति जराशब्दान्तत्वस्यातिदेशो रामशब्दे कथं न भवतीति। तथा हि जराशब्दनिरूपित-अन्तत्वस्य आश्रयो निर्जराशब्दः, तेन रामशब्दः समभिव्याहृतो नास्ति, न तु तद्धर्मस्य य आश्रयस्तद्घटितः, नापि तद्धर्मस्य य आश्रयस्तस्य घटकः। एतस्याः शङ्कायाः समाधानमुपर्युक्तसम्बन्धत्रयेण सह स्वमुखप्रविष्टधर्माश्रयत्वसम्बन्धस्य समावेशेन करणीयम्।

अत्र तात्पर्यमिदमस्ति यद् यस्मिन् यस्य वर्णस्यातिदेशःकरणीयस्तस्य तदतिदिश्यमानधर्मस्य घटके अदन्तादौ प्रकारतावच्छेदकीभूतस्य धर्मस्यापि आश्रयत्वमपेक्ष्यते। अकारे अदन्तस्यारोपे अदन्तत्वरूपधर्मस्य घटकीभूते अदन्ते प्रकारतावच्छेदकीभूतस्य अत्वस्यापि आश्रयत्वमकारे अपेक्षितमस्ति। अकारोऽपि तादृशोऽस्त्येव, अत अतिदेशो भवति। रामशब्दे जराशब्दनिरूपितान्तत्वस्य जरान्तत्वस्य अतिदेशो न भवितुं शक्नोति तस्य अतिदिश्यमानजरान्तत्वरूपधर्मस्य घटकीभूते जरान्ते प्रकारतावच्छेदकीभूतस्य जरात्वधर्मस्य आश्रयत्वाभावात्। स्वमुखप्रविष्टस्य परिष्कारः विजयाटीकायामित्थमस्ति-

स्वघटकपदार्थनिष्ठऽवयत्वव्याप्यधर्माऽवच्छिन्नविशेष्यतानिरूपितप्रकारतावच्छेदकत्वं स्वमुखप्रविष्टत्वम्।स्वपदेन अत्रापि अतिदिश्यमानधर्मो विवक्षितः। परिष्कारेऽस्मिन् अवयवत्वव्याप्यधर्मा आदित्वमध्यत्वाऽन्त्यत्वधर्माः। उच्चरितशब्दः स्वोत्पत्तेस्तृतीये क्षणे विनष्टो भवति। अत आदित्वस्य परिष्कृतं लक्षणमित्थं भवति – स्वविशिष्टत्वमादित्वम्। वैशिषिट्यञ्च स्वघटकत्व - स्वघटकध्वंसाधिकरणक्षणाऽवृत्तित्वोभयसम्बन्धेन। गौरिति पदे गकार औकारो विसर्गश्च इति त्रयो वर्णाः सन्ति। एतेषामुच्चारणं विनाशश्च क्रमेण भवति। अत्रादिवर्णो गकारः। स्वं गौरिति पदं यन्निरूपितमादित्वं विवक्षितमस्ति, तस्य गकारो घटकोऽस्ति। प्रथमक्षणे उत्पन्नस्य गकारस्य द्वितीयक्षणे स्थितिः, तृतीयक्षणे तस्य विनाशः। गकारस्य स्थितिक्षणे औकारस्योत्पत्तिः, गकारस्य विनाशक्षणे औकारस्य स्थितिर्विसर्गस्य चोत्पत्तिः। पूर्वपूर्ववर्णा उत्तरोत्तरान् वर्णान् नाशयन्ति। अन्त्यवर्णस्य विनाशस्तु विनष्टेन उपान्त्यवर्णेन भवति। तदिदं स्पष्टमस्ति यद् यस्मिन् क्षणे गकारस्योत्पत्तिर्भवति किंवा स्थितिस्तदा गौरिति पदस्य घटकीभूता ये वर्णास्तेषां कस्यापि विनाशो न भवति। यस्मिन् क्षणे घटकीभूतस्य कस्यापि वर्णस्य नाशो भवति तस्मिन् क्षणे गकारः स्वयमेव न तिष्ठति। एवं गकारस्य घटकवर्णयोर्ध्वंसक्षणे स्थित्यभावात् स्वघटकत्वं स्वघटकवर्णध्वंसाऽधिकरणक्षणाऽवृत्तित्वमपि। एवमादित्वस्य परिष्कृतलक्षणस्य समन्वयः। मध्यमत्वस्य परिष्कारो यथा –

स्वविशिष्टत्वं मध्यमत्वम्। वैशिष्ट्यञ्च स्वघटकत्व – स्वघटकवर्णध्वंसाधिकरणक्षणवृत्तित्व – स्वघटकवर्णप्रागभावाधिकरणक्षणवृत्तित्व – एतत् त्रितयसम्बन्धेन। अत्र द्वितीयः सम्बन्ध आदित्वे अतिव्याप्तिनिरासार्थः। तृतीयः सम्बन्ध अन्त्यत्वे अतिव्याप्तिनिरासार्थः। अन्त्यत्वस्य स्वरूपमस्ति – स्वविशिष्टत्वमन्त्यत्वम्। वैशिष्ट्यञ्च स्वघटकत्व - स्वधटकवर्णप्रागभावाधिकरणक्षणाऽवृत्तित्व – एतदुभयसम्बन्धेन। अदन्तत्वस्य अवयवे अदन्ते अद् विशेषणम् अत्वञ्च विशेषणतावच्छेदकमस्ति। यथा घटवद् भूतलमित्यत्र घटो विशेषणं घटत्वञ्च प्रकारतावच्छेदकम्, तथैव जरान्तत्वस्य घटके जरान्ते जरा विशेषणं जरात्वं विशेषणतावच्छेदकम्। एवं मुखप्रविष्टत्वस्य स्वरूपमाधारीकृत्य रामशब्दो जरात्वस्य अनाश्रयः। अत रामशब्दे जरान्तत्वातिदेशापत्तेर्निरासो भवति।

व्यपदेशिवद्भावो लक्ष्यानुरोधेन मन्तव्यः। लक्ष्यानुरोधेन अशास्त्रीयाणामपि शास्त्रकृतसङ्केतविषयतावच्छेदकभिन्न – एकाच्त्वादिधर्माणां यथासम्भवमतिदेशो भवति। अत एव इयाय इत्यत्र इकारे एकाच्त्वातिदेशप्रयुक्तं द्वित्वं भवति। लोकन्यायसिद्धोऽस्ति व्यपदेशिवद्भावः। तथा च एतस्य लोकन्यायसिद्धत्वं समर्थयन् नागेशभट्टो ब्रूते - लोकेऽपि बहुपुत्रसत्वे नैकस्मिन् ज्येष्ठत्वकनिष्ठत्वादिव्यवहारोऽयं मे ज्येष्ठः कनिष्ठो मध्यम इति।